तिभ्यः ख्रच्” । उणां । २ । १२३ । इति ख्रच् ।) राक्षसः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ व्याघ्रः । इति मेदिनी ॥ (यथा, उणादिटीका “कर्व्वुरो व्याघ्ररक्षसोः” । २ । १२३ ॥)

कर्व्वरी, स्त्री, (कर्व्वर + षित्वात् ङीष् ।) शिवा । इति विश्वमेदिन्यौ ॥ हिङ्गुपत्री । इति जटाधरः ॥ (व्याघ्री । राक्षसी । इत्युणादिवृत्तिः । २ । १२३ ॥)

कर्व्वुरः, पुं, (कर्व्वति हिनस्ति सदर्पो भवति वा । कर्व्व दर्पे हिंसायाञ्च । “मद्गुरादयश्चेति” + उरच् ।) राक्षसः । इति शब्दार्णवः ॥ चित्रवर्णः । इत्यमरः । २ । ९ । ३४ ॥ शटी । इति भरतः ॥

कर्व्वूरः, पुं, (कर्व्व + खर्जूरादित्वात् ऊरः । उणां १ । ८२ ।) राक्षसः । शटी । इत्यमरः ॥ २ । ९ । ३४ ॥

कर्श्यः, पुं, (कृश् + यत् ।) कर्चूरः । इति राजनिर्घण्टः । कचूर इति हिन्दीभाषा ॥

कर्षः, पुं स्त्री, (कृष् विलेखने पचाद्यच् । कर्म्मणि करणे वा घञ् ।) षोड़शमाषकपरिमाणम् । अशीतिरत्तिकाः । तत्पर्य्यायः । अक्षः २ । इत्यमरः । २ । ९ । ८६ ॥ वैद्यकमते तोलकद्वयम् । तत्पर्य्यायः । सुवर्णम् २ अक्षः ३ विड़ालपदकम् ४ पिचुः ५ पाणितलम् ६ उडुम्बरम् ७ तिन्दुकम् ८ कवड़ग्रहः ९ । इति परिभाषा ॥ दशमाषकः । इति राजनिर्घण्टः ॥
(“कोलद्वयन्तु कर्षः स्यात् स प्रोक्ता पाणिमानिका । अक्षः पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम्” ॥ इति शार्ङ्गधरे पूर्व्वखण्डे । १ अध्याये ॥)

कर्षः, पुं, (कृष् + भावे घञ् ।) कर्षणम् । इति मेदिनी ॥ विभीतकवृक्षः । इति शब्दरत्नावली ॥

कर्षकः, त्रि, (कर्षति भूमिमिति । कृष् + ण्वुल् ।) कृषिजीवी । कृषाण इति भाषा ॥
(“सुखमापतितं सेवेत् दुःखमापतितं सहेत् । कालप्राप्तमुपासीत शस्यानामिव कर्षकः” ॥ इति महाभारते । ३ । २५८ । १५ ॥)
तत्पर्य्यायः । क्षेत्राजीवः २ कृषिकः ३ कृषीबलः ४ । इत्यमरः । २ । ९ । ६ ॥ कार्षकः ५ । इति तट्टीका ॥ आकर्षणकर्त्ता च ॥

कर्षणं, क्ली, (कृष् + भावे ल्युट् ।) कृषिकर्म्म । लाङ्गलादिना भूम्यादिखननम् । इति हेमचन्द्रः । चास इति भाषा ॥ आकर्षणम् । टानन् इति भाषा ॥ (शोषणम् । पीड़नम् । यथा मनुः ७ । ११२ ।
“शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा । तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात्” ।)

कर्षणिः, स्त्री, (कृष् + अनिः ।) असती । इत्युणादिकोषः ॥

कर्षणी, स्त्री, (कर्षण + गौरादित्वात् ङीष् ।) क्षीरिणीवृक्षः । इति राजनिर्घण्टः ॥

कर्षफलः, पुं, (कर्षः कर्षमात्रं फलं यस्य ।) विभीतकवृक्षः । इत्यमरः । २ । ४ । ५८ ॥ (अस्य पर्य्यायाः यथा,—
“विभीतकस्त्रिलिङ्गः स्यादक्षः कर्षफलस्तु सः । कलिद्रुमो भूतवासस्तथा कलियुगालयः” ॥
गुणाश्चास्य विभीतकशब्दे ज्ञेयाः । इति भावप्रकाशस्य पूर्व्वखण्डे । १ भागे ॥)

कर्षफला, स्त्री, (कर्षफल + टाप् ।) आमलकीवृक्षः । इति रत्नमाला ॥ (आमलकीशब्देऽस्या गुणादिकं ज्ञातव्यम् ॥)

कर्षार्द्धं, क्ली, (कर्षस्य अर्द्धम् ।) तोलकपरिमाणम् । इति वैद्यकपरिभाषा ॥ (“कर्षार्द्धं वा कणाशुण्ठ्योः” । “कर्षः कर्षार्द्धमथो पलं पलद्वयमथाकर्षश्च” ॥ इति वैद्यकचक्रपाणिसंग्रहज्वराधिकारकासाधिकारयोः ॥)

कर्षिणी, स्त्री, (कर्षति इति । कृष् + णिनिस्ततो ङीप् ।) क्षीरिणीवृक्षः । अश्वमुखबन्धनरज्जुस्थितलौहम् । तत्पर्य्यायः । खलीनः २ कवीयम् ३ कविका ४ । इति जटाधरः ॥ (त्रि । मनोहारी । यथा रघुः १९ । ११ ।
“प्राणकान्तमधुगन्धकर्षिणीः
पानभूमिरचनाः प्रियासखः” ॥)

कर्षूः, पुं, (कृष् + “कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः” । उणां १ । ८२ । इति ऊः ।) वार्त्ता । करीषाग्निः । इत्यमरः । ३ । ३ । २२१ ॥ वार्त्ता अत्र कृषिः । इति रमानाथः ॥ जीविका । इति भरतः ॥

कर्षूः, स्त्री, (कृष् विलेखने + “कृषिचमितनीति” ऊः उणां १ । ८२ ।) कुल्या । अल्पा कृत्रिमा सरित् । इत्यमरः । ३ । ३ । २२१ ॥ नदीमात्रम् । इति रत्नकोषः ॥ इष्टखातः । इति मेदिनी ॥ तद्यथा । चतुरङ्गुलपृथ्वीस्तावदन्तं रालयाधः खाता वितस्त्यायतास्तिस्रः कर्षूः कुर्य्यात् कर्षूसमीपे अग्नित्रयमुपसमाधाय परिस्तीर्य्य तत्रैकैकस्मिन्नाहुतित्रयं जुहुयात् । इति श्राद्धविवेक धृतविष्णुसूत्रम् ॥

कर्हि, व्य, (किम् + “अनद्यतने र्हिलन्यतरस्याम्” । ५ । ३ । २१ इति । र्हिल् कादेशः ।) कदा । कस्मिन् काले । इति व्याकरणम् ॥ कखन कवे इति भाषा ॥ (यथा, ऋग्वेदे ६ । ३५ । २ ।
“कर्हिस्वित्तदिन्द्र यन्नृभिर्नृन्वी-
रैर्वीरान् नीलयासे जयाजीन्” ॥)

कर्हिचित्, व्य, (कर्हि च चिच्चेति विग्रहः । पाणिनिमतानुसारेण भिन्नपदद्वयम् मुग्धबोधमते तु “किमः त्रयन्ताच्चिचनौ” । इति चित् ।) कस्मिंश्चित् काले । कोनकाले इति भाषा । तत्पर्य्यायः । जातु २ कदाचित् ३ । इति हेमचन्द्रः ॥ (यथा, भागवते १० । ८४ । १३ ।
“यस्यात्मबुद्धिः कुणपे त्रिधातुके
स्वधीः कलत्रादिषु भौम इज्यधीः ।
यत्तीर्थबुद्धिः सलिले न कर्हिचित्
जनेष्वभिज्ञेषु स एव गोखरः” ॥)

कल, त् क गतौ । सङ्ख्यायाम् । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) अन्त्यस्थलतीयोपधः । कलयति कालं धीरः । इति दुर्गादासः ॥

कल, ङ सङ्ख्यारुतोः । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अकं च-सेट् ।) ङ कलते दिवसं वृद्धः गणयतीत्यर्थः । रुत् शब्दः । इति दुर्गादासः ॥

कल, क नुदौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क कालयति । नुदिरिति नुद औणप्रेरणे इत्यस्य औणादिककिप्रत्यये रूपम् । इति दुर्गादासः ॥

कलं, क्ली, (कड़ति माद्यति अनेन । कड़ मदे + “हलश्च” । ३ । ३ । १२१ । इति घञ् । संज्ञापूर्व्वकत्वात् वृद्ध्यभावः । डलयोरैक्यत्वम् ।) शुक्रम् । इति मेदिनी ॥ कोलिवृक्षः । इति शब्दचन्द्रिका ॥

कलः, पुं, (कल + भावे घञ् वृद्ध्यभावः ।) मधुरास्फुटध्वनिः । इत्यमरः । १ । ७ । २ ॥
(“जगौ कलं वामदृशां मनोहरम्” ॥ इति भागवतम् । १० । २९ । ३ ॥) सालवृक्षः । इति राजनिर्घण्टः ॥

कलः, त्रि, (कलयति मान्द्यं नयति जाठराग्निम् । कल + णिच् + अच् । धातूनामनेकार्थत्वात् विशेषतः कलिङ्कलिरित्यनयोश्च तथात्वम् ।) अजीर्णः । इति मेदिनी ॥ (अव्यक्तमधुरध्वनिः । यथा रघुः । १ । ४१ ।
“सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ” ॥)

कलकः, पुं, (कलते इति । कल + ण्वुल् । स्वार्थे कन् वा ।) शकुलमत्स्यः । इति हेमचन्द्रः ॥ (शकुलशब्देऽस्य गुणादयोऽवगन्तव्याः ॥)

कलकण्ठः, पुं, (कलप्रधानः कण्ठो यस्य ।) कलध्वनिः । हंसः । पारावतः । पिकः । इति मेदिनी ॥ (यथा, राजेन्द्रकर्णपूरे ३ । “युष्माकं रतिकान्तकार्म्मुकलताझङ्कारकान्ते रुते, सोत्कण्ठं कलकण्ठकण्ठकुहरोद्भूतेऽपि माभून्मनः” ॥)

कलकलः, पुं, (कलादपि कलः । युगपत्समुत्थितबहुलशब्दानामेकीभूततया तुमुलत्वात्तथात्वम् । कलशब्दे + घञ् । वृद्ध्यभावः । यद्वा कलः प्रकारः गुणवचनत्वात् प्रकारे द्वित्वम् ॥) कोलाहलः । (यथा, गीतगोविन्दे । १ । ३८ ।
“उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुरक्रीड़त्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः” ॥) सालनिर्य्यासः । इति मेदिनी ॥

कलघोषः, पुं, (कलो मधुरो घोषो ध्वनिर्यस्य ।) कोकिलः । इति शब्दरत्नावली ॥

कलङ्कः, पुं, (कलयति इति । कल + क्विप् । कल् चासौ अङ्कश्चेति ।) चिह्नम् । अपवादः ।
(“उत्तमस्य विशेषेण कलङ्कोत्पादको जनः” ॥ इति कथासरित्सागरे । २४ । २०४ ॥) लौहमलम् । इति मेदिनी ॥

कलङ्कषः, पुं, (करेण कषति हिनस्ति नाशयति वा । बाहुलकात् खच् मुम् च रस्य लः कलेन गर्ज्जनेन कषति वा ।) सिंहः । इति शब्दमाला ॥

कलङ्कषा, स्त्री, (कलङ्कष + टाप् ।) करताली । इति शब्दरत्नावली ॥

कलङ्की, [न्] त्रि, (कलङ्कोऽस्त्यस्य । इनिः ।) अपवादग्रस्तः । यथा,—तिथ्यादितत्त्वे ।
“कलङ्की जायते विल्वे तिर्य्यग्योनिश्च निम्बके” ।
चिह्नयुक्तः । लौहमलविशिष्टः ॥ चन्द्रः ॥

कलङ्कुरः, पुं, (कं जलं लङ्कयति गमयति भ्रामयतीत्यर्थः । लकि गतौ + णिच् + उरच् ।) आवर्त्तः । जलभ्रमः । इति त्रिकाण्डशेषः ॥